# Durvasahkritam Shankara Ashtakam

# દુર્વાસકૃતમ્ શઙ્કરાષ્ટકમ્

## Document Information

Text title : Durvasahkritam Shankara Ashtakam

File name : shankarAShTakamdurvAsakRRitam.itx

Category : shiva, shivarahasya, aShTaka

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 27 | 22-30||

Latest update : September 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# દુર્વાસકૃતમ્ શઙ્કરાષ્ટકમ્

સ્વધામા ક્ષિપ્રેષુર્મગ ઇવ સુભીમો (સુભીમે) દહરગ-
    સ્ત્વધૂમો જ્યોતિસ્ત્વં મહિમગત આદ્યશ્ચ ભગવન્ ।
અષાઢં ત્વામુગ્રં સ્થિરકરણકાયેન વચસા
    નુમસ્સ્તૂમોદ્ધેમસ્તનુગતમથૈનો નિવપન (નિવપતુ) ॥ ૨૨॥

મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નોઽવધીસ્તનયં તં સુતં મે ગાવશ્ચાશ્વાન્હવિષા ત્વાં યજામઃ । ૨૩।
શમ્ભોઽસ્મદીયવિવિધેષુ દુરાવરેષુ
    પાપેષુ નિષ્કૃતિમતોઽપ્યવિનાશકેષુ ।
એકદ્વિધાત્રિચતુરેષ્વપિ પઞ્ચકેષુ
    ત્વં શૂરભૂરિષુવધિઃ કરુણાર્દ્રદૃષ્ટ્યા ॥ ૨૪॥

અન્તર્યે ન ભજન્તિ મૂઢમતયો ધ્યાનં મનીષાતતં
    રુદ્રં ત્ર્યમ્બકમમ્બિકાબિલસિતં શ્રીકણ્ઠમીશં સદા ।
લિઙ્ગે કોમલબિલ્વપલ્લવજલૈર્નાર્ચન્તિ યે જિહ્વયા
    ત્વદ્ભુ(ભ)ક્તામલશેષભુક્તિરહિતા ગૃહ્ણન્તિ તે વૈ મલમ્ ॥ ૨૫॥

દેવં લિઙ્ગવરે સદા સ્થિતમહો બિલ્વીદલૈઃ કોમલૈ-
    ર્નીરૈર્વાપિ મઘ(મખ)ક્રિયાસુ ભગવન્ સોમસ્ય વા ગહ્વ(હ્વ)યા ।
ભૂર્ણિત્વા સવનેષુ ક્રોધિતવપુર્ભીમં મૃગેન્દ્રોપમં
    યાચે દેવ સદા ગિરા મધુરયા મા ચુક્રુધશ્શઙ્કર ॥ ૨૬॥

કસ્ત્વાં દૈવતસાર્વભૌમરહિતં યાચેઽથ (ચ) ઈશાનકં
    આભિસ્ત્વાં ભગવન્ સદૈવ ચ નમોગીર્ભિશ્ચ રુદ્રોદ્યતૈઃ ।
નક્તઞ્ચાપિ દિવા મહેશ પિતરં હૃદ્વં બૃહન્તં મૃધં
    મૃષ્ટન્ત્વામજરં સુષુમ્ણમપિ વૈ રુદ્રાણ્યયા સંયુતમ્ ॥ ૨૭॥

રાજચન્દ્રકલાધરઞ્ચ ભુવનસ્યેશાનમિન્દુપ્રભં
    ત્વદ્ભક્તાઃ કવયો હવેમ સતતં ત્વલ્લિઙ્ગપૂજાદરાઃ ।

ત્વં શમ્ભુઃ પ્રમતિઃ પિતાસિ હિતકૃદ્બન્ધુસ્ત્વમેવાસિ મે
  ત્વં માતા પરમો વયસ્કૃદપિ મે ત્વજ્જામયો વા વયમ્ ॥ ૨૮॥

ત્વાં દેવઞ્ચ ભજામ શઙ્કર વિભો ત્વદ્ભક્તિધારારસૈઃ ॥ ૨૯॥

દુર્વાસાષ્ટકમેતદેવ કલિતં ચિત્તે કુતો દુર્વસઃ
  ક્રોધો નામ ભવિષ્યતીશભજનાત્તં વૈ શ્રિયો વાઞ્છિતાઃ ।
ઉદ્યચ્ચામરછત્રપઙ્ક્તિવિલસન્મત્તેભકુમ્ભસ્થિતા
  રાજદ્વન્દિગણસ્તુતો મધુરયા વાચા સદાસ્તે સુખી ॥ ૩૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે દુર્વાસઃકૃતં શઙ્કરાષ્ટકમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૨૭ । ૨૨-૩૦॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 27 . 22-30..

Proofread by Ruma Dewan

---

*Durvasahkritam Shankara Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*